# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – ३०-०१-२०११ अङ्काः–१००

पूर्वाह्णे - १०-०० तः १-०० पर्यन्तम् समयः–घण्टात्रयम्

**1 पञ्चानां एकवाक्येन उत्तरं लिखत ।** 5

१. कस्यौषधं नास्ति ?
२. हिमालयस्य पुत्री का ?
३. किरातार्जुनीयं केन विरचितम् ?
४. पवनः कथं नुदति ?
५. मातङ्गः कः ?
६. शिखण्डिनं पूरोधाय पार्थः किमकरोत् ?
७. घटोत्कचेन उक्तः समयः कः ?
८. के कान् उपभुज्य अमर्त्याः जाताः ?

**2 पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 10

१. कः कं उपहन्ति ?
२. अवन्तिपुरी कथमस्ति ?
३. वामदेवः राजानं प्रति किमवदत् ?
४. अर्जुनः कुतः पर्याकुलो बभूव ? कथं पुनर्नवो बभूव सः ?
५. धर्मराजस्य दृष्ट्या बान्धवाः के ?
६. जलक्लिन्नेन मुनिना ब्राह्मणं प्रति किमुक्तमासीत् ?
७. अब्धे स्वभावं निरूपयत ।
८. नारदः किं समादिदेश ?

**3 द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत ।** 8

१. भीमः घटोत्कचं किमिति वर्णयति ?



पश्चादनुवर्तते

२. सौख्यत्रयोणापि कुन्ती कथं वञ्चिताऽसीत्?

३. सुयोधनः कर्णाय स्वपरिदेवनं कथं प्रादर्शयत् ?

४. चित्रगुप्तः किं किं दर्शयित्वा मातङ्गम् अमुञ्चत् ?

**4** **वाक्यत्रयं सप्रसङ्गं विवृणुत ।** 9

१. भवत्साहाय्यकरो राजकुमारोऽद्य श्वो वा समागमिष्यति ।

२. अतिजीनतया अनाम्नातानि छन्दांसि इव ।

३. अहो! अत्याहितं, अविमृश्यकारी स्त्रीजनः ।

४. भवति, रूपमात्रेण मानुषः। न वीर्येण ।

५. इदं स्वसंभृतमिव स्वच्छन्दमानन्दति ।

**5** **द्वयोः भावं विशदयत ।** 8

१. विहितां प्रियया मनः प्रियामथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ।।

२. अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।।

३. शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गो गर्दभौ।
व्याधिर्भेषजसंग्रहैश्च विविधैमन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ।।

**6** **श्लोकद्वयं पूर्णं लिखत ।** 6

१) यथा + .......................................... कर्मणा ।।

२) लब्ध्वा + .......................................... पुरुषाधमस्य ।।

**7** **एकस्य कवेः देशकालग्रन्थान् अधिकृत्य लिखत ।** 4

१) कालिदासः २) नीलकण्ठदीक्षितः

**8** **एकस्य लघुटिप्पणीं लिखत ।** 4

१) दुर्योधनः   २) हिडिम्बा

**9** **चत्वारि पदानि वाक्ये योजयत ।** 4

| | | |
|---|---|---|
| १) बहुधा | २) प्रत्ययः | ३) उच्चैः |
| ४) उपेत्य | ५) संपत् | ६) ददर्श |

**10** **चतुर्णां रूपाणि विवेचयत ।** 4

| | | |
|---|---|---|
| १) ययाचे | २) वर्त्मनि | ३) विधिना |
| ४) वैराटिः | ५) नभसः | ६) विषीदसि |

**11** **चतुर्णां पर्यायपदानि लिखत ।** 4

| | | |
|---|---|---|
| १) रत्नगर्भा | २) गाङ्गेयः | ३) अद्रौ |
| ४) वदनम् | ५) अनीकम् | ६) तुरीया |

**12** **चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 4

| | | |
|---|---|---|
| १) सप्तजिह्वः | २) कलकण्ठस्वनेन | ३) मेघालोके |
| ४) अनादरः | ५) रामकृष्णौ | ६) अधिनगरम् |

**13** **चतुर्णां सन्धिं विभज्य नाम लिखत ।** 4

| | | |
|---|---|---|
| १) तावदेनम् | २) ह्येकस्य | ३) अरिष्ठोऽस्तु |
| ४) मैवम् | ५) यन्माम् | ६) ममानुजः |

**14** **द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

| | | |
|---|---|---|
| १) शक्ष्यति | २) जागर्ति | ३) धर्षयेत् |
| ४) व्याजहार | ५) अमन्यत | ६) जानातु |



पश्चादनुवर्तते

**15** **द्वयोः व्याकरणविशेषं लिखत ।** 4

१) अलं परिश्रमेण २) चित्रीयमाणः ३) भवते इयं भारती रोचताम्

**16** **प्रयोगपरिवर्तनं कुरुत ।** 4

१) न खल्वेकचक्रो रथो गच्छति ।

२) ब्राह्मणपुत्रः जलाशयं पश्यति ।

३) मया किमिदानीं क्रियते ।

४) गृह्यतां तव पुत्रः ।

**17** **समासमेकं सलक्षणं विशदयत ।** 4

१) कर्मधारयः २) द्वन्द्वः

**18** **चतुर्थं पदं लिखत ।** 4

| | | | | |
|---|---|---|---|---|
| १) नरभक्षणं | ; राक्षसधर्मः | – | नररक्षणम् | ............... |
| २) वैकर्तनः | ; कर्णः | – | औदरिकः | ................. |
| ३) हन्तव्यः | ; तव्यप्रत्ययः | – | वध्यमानाम् | ................. |
| ४) हन्ति | ; एकवचनम् | – | वृणते | ................. |

**19** **इतरवचनानि लिखत ।** 4

१) मरुतः ............... ............... ।

२) अपसर ............... ............... ।

३) ............... ............... सुमनसः ।

४) ............... ............... अवोचन् ।

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### द्वितीयपत्रिका

दिनाङ्कः - ३०-०१-२०११ अङ्काः-५०

अपराह्ने - १-३० तः ३-०० पर्यन्तम् समयः-सार्धैकहोरा

1 अ) विषयमेकमधिकृत्य दशभि र्वाक्यैः प्रबन्धमेकं लिखत - 5

१) परिसरः २) प्रतिज्ञापालनम् ३) श्रीशङ्कराचार्याः

आ) लुट् लकारः कदा उपयुज्यते ? सोदाहरणं विवृणुत । 4

2 वाक्यरचनोपयुक्तचिह्नानि विशदयत । 5

अथवा

निर्धारणे षष्ठीसप्तम्यौ भवतः । सोदाहरणं विवृणुत ।

3 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत । 6

१. जीयात् २. अयासीत् ३. भविता

४. जज्ञे

4 अर्थान्तरन्यासालङ्कारं सोदाहरणं सलक्षणं विवृणुत । 3

5 यथा चतुर्भिः कनकं परीक्ष्यते । अत्रत्यं वृत्तं सलक्षणं सप्रस्तारं च विशदयत । 3

6 उत्तरयत । 4

१. तिङ्प्रत्ययाः कति ?

२. काव्यं नाम किम् ?

३. शब्दालङ्कारौ कौ ?

४. अधिकरणार्थे का विभक्तिः भवति ?

7 प्रयोगपरिवर्तनं कुरुत । 4

१. बालैः हस्यते । २. बालाः सायङ्काले क्रीडन्ति ।

३. माणवकः गुरुं अवन्दत । ४. त्वं कीर्तिं लभस्व ।



पश्चादनुवर्तते

**8** **दोषान् परिहरत ।** 6

१. हरिः वैकुण्ठे अधितिष्ठति ।
२. भर्तुः साकं गता सीता ।
३. दुर्योधनः पाण्डवान् द्रुह्यति ।
४. अहं सर्पाय न बिभेमि ।
५. ललनाः श्वः नदीं अगच्छन् ।
६. पुत्रस्य साकं पिता गतः ।

**9** **मातृभाषया अनुवादत ।** 5

१. बहु जगद पुरस्तात् तस्य मत्ता किलाहम् ।
२. इमे संस्कृतस्य प्राशत्स्यमधिकृत्य भणितारः ।
३. गुरोः प्रसादेन विद्वांसो भूयास्म ।
४. विक्रीते करिणि किमङ्कुशे विवादः ।
५. दर्शनेषु वेदान्तः प्रधानम् ।

**10** **संस्कृतेन अनुवदत ।** 5

1. ಕೀಟಗಳಲ್ಲಿ ಜೇನುನೊಣ ಹೆಚ್ಚು ಉಪಕಾರಿ.
   Among the insects bee is most helpful.
2. ಅಕ್ಕಸಾಲಿಗರು ಚಿನ್ನದ ಒಡವೆಗಳನ್ನು ಮಾಡಿದರು.
   Goldsmiths made ornments using gold.
3. ಸೀತೆ ಯಾವ ಕಷ್ಟವನ್ನೂ ಲೆಕ್ಕಿಸಲಿಲ್ಲ.
   Seetha did not mind any troble.
4. ನೀವು ಬಂದಾಗ ನಾನು ಮನೆಯಲ್ಲಿರಲಿಲ್ಲ.
   I was not at home when you came.
5. ನಮ್ಮ ಆಹಾರವನ್ನು ಉತ್ಪಾದಿಸಲು ನಾವೇ ಸಮರ್ಥರಾಗಿದ್ದೇವೆ.
   We are able to earn our own food.

* * * * *